Q) which act of the Abhijñānśakuntalā is best according of your opinion ?

= नाट्ये किमपि प्रसिद्धम् ऐतिहासिकं काल्पनिकं वा कथानकं भवति। अभिज्ञानशाकुन्तलम् अस्ति एकं समस्या प्रधानं घटनाप्रधानं वा नाटकम्। नाटकेऽस्मिन् नायिका शकुन्तला नायकेन राजा दुष्यन्तेन गान्धर्वविवाहविधिना परिणीता। स्वनगरं प्रति परावर्तमानेन तेन "एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय, गच्छसि यावदन्तम् ॥" इत्युक्त्वा स्वनाममाङ्कितमंगुलीयकं स्वयमेव शकुन्तलायाः हस्ते परिधापितम्। इत्यभिज्ञानविषयिणी घटना महाभारतस्यादिपर्वात् गृहीता।

अभिज्ञायते अनेन इति अभिज्ञानम् चिह्नमिति, अभि + ज्ञा + ल्युट्। शकुन्तैः लालिता शकुन्तला। शकुन्तलामधिकृत्य कृतं नाटकं शाकुन्तलम् 'अधिकृत्य कृते ग्रन्थे' इति सूत्रेण 'अण्' प्रत्ययः। 'अभिज्ञानप्रधानं शाकुन्तलम्' अभिज्ञानशाकुन्तलम् इति व्युत्पत्तिं दृष्ट्वा दृष्ट्वा सिद्धमेव अभिज्ञानशाकुन्तलस्य समस्या प्रधानत्वम् नायिकाप्रधानत्वं च।

अतः समस्यां नायिकां च आदाय कृतमस्य अभिज्ञानशाकुन्तलम् इति नामकरणं सर्वथा फलमुचितम् चास्ति ।
अथवा - अभिज्ञानसहितं शाकुन्तलम् अभिज्ञानशाकुन्तलम् ।
अथवा - अभिज्ञानज्ज शाकुन्तलाज्व इति अभिज्ञानशाकुन्तलम् ।
कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् .
कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् , अभिज्ञानशाकुन्तले चतुर्थेऽङ्के कविः कण्वरूपेण उपस्थितोऽस्ति, अत एव चतुर्थम् अङ्कं शाकुन्तलस्य हृदयं मत्वा आलोचकैः स्वीकृतमस्ति -

काव्येषु नाटकं रम्य तत्र रम्या शकुन्तला ,
तत्रापि चतुर्थेऽङ्क ........ ॥

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के लौकिकालौकिक प्रकृति-मानवयोः विलक्षणं समत्वयोऽस्थि, "वनौकसोऽपि वयं लौकिकज्ञा एव' इति कण्वस्य उद्घोषणा चतुर्थाऽङ्कस्य वैशिष्ट्यं द्विगुणयति , अरण्यवासिन्याः शकुन्तलायाः पतिगृह हस्तिनापुरगमनम् अरण्यराजप्रासादयोः किमपि विलक्षणं सम्बधं प्रतिपादयति ।
"सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्' इत्यनेन शकुन्तलायाः पतिगृहगमनाय अनुज्ञा प्रार्थिता ।

ं क्षौमं केनचिदिन्दुपाण्डुतरुणा मांगल्यमाविष्कृतम्' इत्यनेन शकुन्तलायै वनस्पतिभि: आभूषणप्रदानमपि विशिष्टा घटना अस्ति। 'अस्मान् साधु विचिन्त्य .....' इति महर्षिणा कण्वेन दुष्यन्ताय तथा शुश्रूषस्व गुरून् कुरु - इत्यनेन शकुन्तलायै कृत उपदेश: तथा समाजे सर्वेषां कृते महदुपयोगो अस्ति।

आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।

बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत: ॥

नान्द्यारम्भे सूत्रधारेण पात्राणां अवधानोपदेशार्थम् उक्ते सति सुविहितप्रयोगतया र्यस्य न किमपि परिहास्यते इति ततोवचनं श्रुत्वा सूत्रधारमुखेन महाकवि: भूतार्थं कथयति साक्षात् सन्तोषपर्यन्तम् अभिनयकौशलं समीचीनं न स्वीकरोमि, कृताभ्यासानां निपुणानामपि सुदृढं चित्तं स्वविषये अविरवडं भवति। ईदृश: वाग्व्यवहार: महाकवे: गुण - गौर - वमेव प्रथयति।

× —— ×